योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३६

षट्त्रिशः सर्गः ३६

प्रह्लाद उवाच ।

आत्मा सर्वपदातीतश्चिरात्संस्मृतिमागतः ।

दिष्ट्या लब्धोऽसि भगवन्नमस्तेस्तु महात्मने ।। १

अभिवन्द्याथ चालोक्य चिरमालिङ्ग्यसे मया ।

कोऽन्यः स्यात्त्वदृते बन्धुर्भगवन्भुवनत्रये ।। २

हंसि पासि ददासि त्वं स्तौषि यासि विवल्गसि ।

अयं प्राप्तोसि दृष्टोसि किं करोषि क्व गच्छसि ।। ३

स्वसत्तापूरिताशेषविश्व विश्वजनीन भोः ।

सर्वत्र लक्ष्यसे नित्यमधुना क्व पलायसे ।। ४

आवयोरन्तरं भूरि जन्मव्यवहितान्तरम् ।

अदूरमद्य संपन्नं दिष्ट्या दृष्टोऽसि बान्धव ।। ५

नमस्ते कृतकृत्याय कर्त्रे भर्त्रे नमोस्तु ते ।

नमः संसारवृन्ताय नित्याय विमलात्मने ।। ६

नमश्चक्राजहस्ताय नमश्चन्द्रार्धधारिणे ।

नमो विबुधनाथाय नमस्ते पद्मजन्मने ।। ७

वाच्यवाचकदृष्ट्यैव भेदो योऽयमिहावयोः ।

असत्या कल्पनैवैषा वीचिवीच्यम्भसोरिव ।। ८

त्वमेवानन्तयानन्तवस्तुवैचित्र्यरूपया ।

भावाभावविलासिन्या नित्ययैव विजृम्भसे ।। ९

नमो द्रष्ट्रे नमः स्रष्ट्रे नमोऽनन्तविकासिने ।

नमः सर्वस्वभावाय नमस्ते सर्वगात्मने ।। १०

प्रतिजन्म चिरं बह्व्यो दीर्घदुःखवता मया ।

त्वया मयोपदिष्टेन दग्धेनापहतौजसा ।। ११

आलोकिता लोकदृशो दृष्टा दृष्टान्तदृष्टयः ।

न प्राप्तस्तत्त्वयाऽनेन किंचिदासादितं भवेत् ।। १२

सर्वं मृत्काष्ठपाषाणवारिमात्रमिदं जगत् ।

नेहास्ति त्वदृते देव यत्प्राप्तौ नाभिवाञ्छति ।। १३

देवायमद्य लब्धोऽसि दृष्टोऽस्यधिगतोऽसि च ।

संप्राप्तोऽसि गृहीतोऽसि नमस्तेस्तु न मुह्यसि ।। १४

योऽक्ष्णोः कनीनिकारश्मिजालप्रोतवपुः स्थितः ।

देव दर्शनरूपेण कथं सोऽत्र न दृश्यते ।। १५

यस्त्वक्स्पर्शौ स्पृशन्सर्वं गन्धं तैलं तिले यथा ।

स्पर्शमन्तःकरोत्येष स कथं नानुभूयते ।। १६

यः शब्दश्रवणादन्तः शब्दशक्तिं परामृशन् ।

रोमाञ्चं जनयत्यङ्गे स दूरस्थः कथं भवेत् ।। १७

जिह्वापल्लवलग्नानि स्वदितस्याग्रतोऽपि च ।

स्वदन्ते यस्य वस्तूनि स्वदते स न कस्य च ।। १८

पुष्पगन्धानुपादाय घ्राणहस्तेन देहकम् ।

य आलोकयति प्रीत्या कस्यासौ न करे स्थितः।।१९

वेदवेदान्तसिद्धान्ततर्कपौराणगीतिभिः ।

यो गीतः स कथं ह्यात्मा विज्ञातो याति विस्मृतिं।।२०

सैवेह देहभोगाली सुभगापीयमद्य मे ।

अन्तर्न स्वदते स्वच्छे त्वयि दृष्टे परावरे ।। २१

त्वया विमलदीपेन भानुः प्रकटतां गतः ।

त्वया शीततुषारेण चन्द्रः शिशिरतां गतः ।। २२

त्वयैते गुरवः शैलास्त्वयैते द्युचरा धृताः ।
त्वयैवेयं धरा धीरा त्वयैवाम्बरमम्बरम् ।। २३
दिष्ट्या मत्तामसि प्राप्तो दिष्ट्या त्वत्तामहं गतः ।
अहं त्वं त्वमहं देव दिष्ट्या भेदोऽस्ति नावयोः ।। २४
अहं त्वमितिशब्दाभ्यां पर्यायाभ्यां महात्मनः ।
तव वा मम वा शाखा संयुक्ताभ्यां नमोनमः ।। २५
नमो मह्यमनन्ताय निरहंकाररूपिणे ।
नमो मह्यमरूपाय नमः समसमात्मने ।। २६
मय्यात्मनि समे स्वच्छे साक्षिभूते निराकृतौ ।
दिक्कालाद्यनवच्छिन्ने स्वात्मन्येवेह तिष्ठसि ।। २७
मनः प्रक्षोभमायाति स्फुरन्तीन्द्रियवृत्तयः ।
शक्तिरुल्लसति स्फारा प्राणापानप्रवाहिनी ।। २८
वहन्ति देहयन्त्राणि कृष्टान्याशावरत्रया
चर्ममांसास्थिदिग्धानि मनःसारथिमन्ति च ।। २९
अयं संविद्वपुरहं न काचिन्न कृतास्पदः ।
देहः पततु वोदेतु यथाभिमतयेच्छया ।। ३०
चिरादहमहं जातः स्वात्मलाभश्चिरादयम् ।
चिरादुपशम याति कल्पस्यान्ते जगद्यथा ।। ३१
चिरात्संसारगामित्वाद्दीर्घे संसारवर्त्मनि ।
विश्रान्तोऽस्मिचिरं श्रान्तः कल्पस्यान्त इवानलः ।। ३२
सर्वातीताय सर्वाय तुभ्यं मह्यं नमो नमः ।
तेभ्योऽपि च नमस्तेस्तु ये मां त्वां प्रवदन्ति च।।३३
अखिलानन्तसंभोगा न स्पृष्टा दोषवृत्तिभिः ।
जयत्यकृतसंरम्भा साक्षिता परमात्मनः ।। ३४
आत्मन्पुष्प इवामोदो भस्त्रापिण्ड इवानिलः ।
तिले तैलमिवास्मिंस्त्वं सर्वत्र वपुषि स्थितः ।। ३५

हंसि पासि ददासि त्वमवस्फूर्जसि वल्गसि ।

अनहंकृतिरूपोऽपि चित्रेयं तव मायिता ।। ३६

जयामीशज्ज्वलद्दीप्तिः सर्वमुन्मीलयञ्जगत् ।

जयाम्युपरतारम्भो जगद्रूयो निमीलयन् ।। ३७

परमाणोस्तवैवान्तरिदं संसारमण्डलम् ।

वटत्वं वटधानायां बभूवास्ति भविष्यति ।। ३८

हयद्विपरथाकारैर्यद्वत्खे दृश्यतेऽम्बुदः ।

तद्वदालोक्यसे देव पदार्थशतविभ्रमैः ।। ३९

भावानां भूरिभङ्गानामभवाय भवाय च ।

भव भावविमुक्तात्मा भावाभावबहिष्कृतः ।। ४०

जहि मानं महाकोपं कालुष्यं क्रूरतां तथा ।

न महान्तो निमज्जन्ति प्राकृते गुणसंकटे ।। ४१

प्राक्तनीं दीर्घदौरात्म्यदशां स्मृत्वा पुनःपुनः ।

कोहं किं तद्बभूवेति हसन्मुक्ताच्छटासितम् ।। ४२

ते प्रयाताः समारम्भा गतास्ते दग्धवासराः ।

येषु चिन्तानलज्वालाजालाकीर्णो भवानभूत् ।। ४३

अद्य त्वं देहनगरे राजा स्फारमनोरथः ।

न दुःखैर्गृह्यसे नापि सुखैर्व्योम करैरिव ।। ४४

अद्येन्द्रियदुरश्वांश्च जित्वा जितमनोगजः ।

भोगारिमभितो भङ्क्त्वासाम्राज्यमधितिष्ठसि।। ४५

अपाराम्बरपान्थस्त्वमजस्रास्तमयोदयः ।

अवभासकरो नित्यं बहिरन्तश्च भास्करः ।। ४६

सर्वदैवासि संसुप्तः शक्त्या संबोध्यसे विभो ।

भोगालोकनलीलार्थं कामिन्या कामुको यथा ।। ४७

दृक्क्षुद्राभिरुपानीतं दूराद्रूपमधु त्वया ।

पीयते स्वीकृतं शक्त्या नेत्रवातायनस्थया ।। ४८

ब्रह्माण्डकोटराध्वान्ताः प्राणापानपरैस्त्वया ।

गतागतैर्ब्रह्मपुरे संप्रेक्ष्यन्ते प्रतिक्षणम् ।। ४९

देहपुष्पे त्वमामोदो देहेन्दौ त्वमृतामृतम् ।

रसस्त्वं देहविटपे शैत्यं देहहिमे भवान् ।। ५०

त्वय्यस्ति विस्मयस्नेहः शरीरक्षीरसर्पिषि ।

त्वमन्तरस्य देहस्य दारुण्यग्निरिव स्थितः ।। ५१

त्वमेवानुत्तमास्वादः प्राकाश्यं तेजसामपि ।

अवगन्ता त्वमर्थानां त्वं भासामवभासकः ।। ५२

स्पन्दस्त्वं सर्ववायूनां त्वं मनोहस्तिनो मदः ।

प्रज्ञानलशिखायास्त्वं प्राकाश्यं तैक्ष्ण्यमेव च ।। ५३

त्वद्वशादियमात्मीया वाचा संप्रविलीयते ।

दीपवत्पुनरन्यत्र समुदेति कुतोऽपि सा ।। ५४

त्वयि संसारवर्तिन्यः पदार्थावलयस्तथा ।

कटकाङ्गदकेयूरयुक्तयः कनके यथा ।। ५५

भवानयमयं चाहंत्वंशब्दैरेवमादिभिः ।

स्वयमेवात्मनात्मानं लीलार्थं स्तौषि वक्षि च ।। ५६

मन्दानिलविनुन्नोऽब्दो गजाश्वनरदृष्टिभिः ।

यथा संलक्ष्यते व्योम्नि तथा त्वं भूतदृष्टिभिः ।। ५७

यथा हयगजाकारैर्ज्वाला लसति वह्निषु ।

तथैवाव्यतिरिक्तैस्त्वं दृश्यसे भुवि सृष्टिषु ।। ५८

त्वं ब्रह्माण्डकमुक्तानामच्छिन्नस्तन्तुराततः ।

क्षेत्रं त्वं भूतसस्यानां चिद्रसायनसेवितम् ।। ५९

असत्तदनभिव्यक्तं पदार्थानां प्रकाश्यते ।

त्वया तत्त्वं यथा पक्त्या मांसानां स्वादवेदनम् ।। ६०

विद्यमानापि वस्तुश्रीर्न स्थिता त्वयि न स्थिते ।

वनितारूपलावण्यसत्तेव गतचक्षुषः ।। ६१

सदपीह न सत्तायै वस्तु नावर्जितं त्वया ।

तृप्तये न स्वलावण्यं मुकुरात्प्रतिबिम्बितम् ।। ६२

लुठति त्वां विना देहः काष्ठलोष्टसमः क्षितौ ।

सन्नप्यसन्नगोच्छ्रायः श्यामास्विव रविं विना ।। ६३

सुखदुःखक्रमः प्राप्य भवन्तं परिनश्यति ।

प्राकाश्यमासाद्य यथा तमस्तेजोऽथवा हिमम् ।। ६४

त्वदालोकनयैवैते स्थितिं यान्ति सुखादय ।

सूर्यालोकनया प्रातर्वर्णाः शुक्लादयो यथा ।। ६५

लब्धात्मानो विनश्यन्ति संबन्धक्षण एव ते ।

ते तमांसीव दीपस्य दृष्टा एव व्रजन्त्यलम् ।। ६६

तमस्ता तमसो दीपासत्तायां स्फुटतां गता ।

दीपसंबन्धसमये सा चोत्पद्य विनश्यति ।। ६७

तदेवं सुखदुःखश्रीर्दृष्ट्वैव त्वामनामयम् ।

जायते जातमात्रैवं सर्वनाशेन नश्यति ।। ६८

भङ्गुरत्वादिह स्थातुं कालं नाणुमपि क्षमा ।

निमेषलक्षभागाख्या तन्वी कालकला यथा ।। ६९

गान्धर्वी नगरी तन्वी सुखदुःखादिभावना ।

स्फुरति त्वत्प्रसादेन त्वयि दृष्टे विलीयते ।। ७०

त्वदालोकेक्षणोद्भूता त्वदालोकेक्षणक्षया ।

मृतेव जाता जातेव मृता केनोपलक्ष्यते ।। ७१

क्षणमप्यस्थिरं वस्तु कथं कार्यकरं भवेत् ।

तरङ्गैरुत्पलाकारैर्माला कथमवेक्ष्यते ।। ७२

यदा वा जातनिर्नष्टं क्रियां वस्तु करिष्यते ।

तदा रमेत लोकोऽयं मालां कृत्वा तडिद्गणैः ।। ७३

इमां सुखादिकां लक्ष्मीं विवेकिजनचेतसि ।

स्थितः सन्नेव गृह्णासि न जहासि समस्थितिम् ।। ७४

अविवेकिषु योऽसि त्वं सहजात्मन्यदृच्छया ।

तद्रूपकथनेनालं ममानल्पपदास्पद ।। ७५

निरीहेण निरंशेन निरहंकृतिना त्वया ।

सता वाप्यसता वापि कर्तृत्वमुररीकृतम् ।। ७६

जय प्रोड्डामराकार जय शान्तिपरायण ।

जय सर्वागमातीत जय सर्वागमास्पद ।। ७७

जय जात जयाजात जय क्षत जयाक्षत ।

जय भाव जयाभाव जय जेय जयाजय ।। ७८

उल्लसाम्युपशाम्यामि तिष्ठाम्यधिगतोऽस्मि च ।

जयी जयाय जीवामि नमो मह्यं नमोऽस्तु ते ।। ७९

त्वयि स्थिते मयि विगतामयात्मनि

स्वसंस्थितौ व्यपगतरागरञ्जने ।

क्व बन्धनं क्व च विपदः क्व संपदो

भवाभवौ क्व शममुपैमि शाश्वतम् ।। ८०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे आत्मस्तवनं नाम षट्त्रिंशः सर्गः ।। ३६ ।।